श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णब्रह्मतन्त्रपरकालमहादेशिक कृतिषु

# ॥ श्रीलक्ष्मीहयवदनपञ्चरत्नम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयवदनपञ्चरत्नम् ॥

ज्ञानानन्दामलात्मा कलिकलुषमहा तूलवातूलनामा
सीमातीतात्मभूमा मम हयवदना देवता धावितारिः।
याता श्वेताब्जमध्यं प्रविमलकमल स्रग्धरा दुग्धराशिः
स्मेरा सा राजराजप्रभृति नुतिपदं सम्पदं संविधत्ताम्॥ १ ॥

तारा ताराधिनाथस्फटिकमणिसुधा हीरहाराभिरामा
रामा रत्नाब्धिकन्याकुचलिकुच परीरम्भसंरम्भधन्या।
मान्याऽनन्यार्हदास्यप्रणततति परित्राणसत्रात्तदीक्षा
दक्षा साक्षात्कृतैषा सपदि हयमुखो देवता साऽवतान्नः॥ २ ॥

अन्तर्ध्वान्तस्य कल्यं निगमहृदसुर ध्वंसनैकान्तकल्यम्
कल्याणानां गुणानां जलधिमभिनमद् बान्धवं सैन्धवास्यम्।
शुभ्रांशु भ्राजमानं दधतमरिदरौ पुस्तकं हस्तकञ्जैः
भद्रां व्याख्यानमुद्रामपि हृदि शरणं याम्युदारं सदारम्॥ ३ ॥

वन्दे तं देवमाद्यं नमदमरमहा रत्नकोटीरकोटी-
वाटीनिर्यत्ननिर्यद्घृणिगण मसृणीभूतपादांशुजातम्।
श्रीमद्रामानुजार्यश्रुतिशिखरगुरु ब्रह्मतन्त्रस्वतन्त्रैः
पूज्यं प्राज्यं सभाज्यं कलिरिपुगुरुभिः शश्वदश्वोत्तमाङ्गम्॥ ४ ॥

विद्या हृद्याऽनवद्या यदनघ करुणासारसारप्रसारात्
धीराधाराधरायामजनि जनिमतां तापनिर्वापयित्री।
श्रीकृष्णब्रह्मतन्त्रादिमपदकलिजित् संयमीन्द्रार्चितं तत्
श्रीमद्धामातिभूम प्रथयतु कुशलं श्रीहयग्रीवनाम॥ ५ ॥

॥ इति श्रीलक्ष्मीहयवदनपञ्चरत्नं संपूर्णम्॥